Homas
the spiritual way to success
K. Krishna Prasad Bhat
Website: http://homas.in
Email: homasonline@gmail.com
Mobil: 8000858858 /9940406777



अथ श्रीकराष्टाक्षरविधानमुच्यते —

वामदेव ऋषिः । पङ्क्तिश्छन्दः । हरिर्देवता । भीषय भीषय हुं हृत् । त्रासय त्रासय हुं शिरः । प्रमर्दय प्रमर्दय हुं शिखा । प्रध्वंसय प्रध्वंसय हुं कवचम् । रक्ष रक्ष हुं अस्त्रम् ॥ अथाक्षरन्यासः —

मूर्धाक्षिकण्ठहृदयोदरसोरुजङ्घा-
पादद्वयेषु लिपिशो न्यसतु स्वदेहे ।
विप्रादिकान् मुखकरोरुपदेषु वर्णान्
चक्रादिकानपि करेषु ततस्तदस्त्रात् ॥

अस्यार्थः — पूर्वं मूर्धाक्षीत्याद्युक्तस्थानेषु अष्टौ वर्णान् क्रमेण न्यस्त्वा, पुनर्विप्रादिकानित्यस्यायमर्थः । उं ब्राह्मणेभ्यो नमः । तिं क्षत्रियेभ्यो नमः । ष्ठं वैश्येभ्यो नमः । श्रीं शूद्रेभ्यो नमः । इति मुखकरोरुपदेषु, कं चक्राय नमः । रं शङ्खाय नमः । स्वां गदायै नमः । हां पद्माय नमः । इति चतुर्भुजमात्मानं ध्यात्वा तत्तत्करेषु न्यसेदिति ॥

दुग्धाब्धिद्वीपवर्यप्रविलसितसरोद्यानकल्पद्रुमाधो
भद्राम्भोजन्मपीठोपरिगतविनतानन्दनस्कन्धसंस्थः ।
दोर्भिर्बिभ्रद्रथाङ्गं सदरमथ गदापङ्कजे स्वर्णवर्णो
भास्वन्मौलिर्विचित्राभरणपरिगतः स्याच्छ्रियै वो मुकुन्दः ॥

उत्तिष्ठ श्रीकर स्वाहा इति मन्त्रः । ऐश्वर्यप्रधानोयं मन्त्रः । अष्टलक्षजपः ।

श्रीदुग्धवृक्षोत्थसमिद्भिरब्जैः साज्येन दौग्धेन च सर्पिषा च ।

साज्येन दौग्धेनेति आज्यसिक्तेन क्षीरान्नेनेत्यर्थः । श्रीवृक्षं–बिल्वम् । एतैरष्टद्रव्यैर्दशांशं पुरश्चरणाहोमः ।

अथ पूजाविधिः—

वैष्णवपीठे समावाह्य समर्चयेत् । श्रियै० मत्यै० धृत्यै० कान्त्यै० इति दिक्पत्रेषु, वासुदेवाय० सङ्कर्षणाय० प्रद्युम्नाय० अनिरुद्धाय० इति कोणगेषु पत्रेषु समर्चयेत् । देवस्य वामदक्षिणयोः पार्श्वयोः शङ्खनिधये० पुष्प(पद्म)निधये० इति, विष्वक्सेनं च देवस्य वामपार्श्वे । पुनरिन्द्रादीन् संयजेत् ॥

अथ प्रयोगः—

दूर्वां घृतप्रसिक्तां जुहुयादयुतं नरस्तु हुतशिष्टैः ।
आज्यैश्चरुमुपयुञ्ज्याद्दद्याद्गुरवे च दक्षिणां शक्त्या ॥

परिभोजयेच्च विप्रान् तेषु दिनेषु स्वशक्तितो भक्त्या ।
अपमृत्युरोगपापान् विजित्य स तु दीर्घमायुराप्नोति ॥

दूर्वाभिराज्यैश्चरुणा च हुत्वा तत्संपातमुपयुञ्ज्यादित्यर्थः ॥

प्रयोगान्तरम्—

अनुदिनमादित्यमुखः प्रजपेदूर्ध्वीकृतस्वबाहुयुगः ।
तस्य गृहेऽन्नसमृद्धिश्चिराय सञ्जायते सुपुष्टतरा ॥